This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशायनमः॥ श्रियंदिशतु वोदेवः श्रीनाभेयुजिनःसदा॥ मोक्षमार्गसतांब्रूतेयदागमपदावली॥१॥
बालानामवबोधायस्वस्यार्थस्मरणायवा॥ वाग्भट्टालंकृतेर्व्याख्यां कुर्वेसंक्षेपयुक्तितः॥२॥ श्रियमिति॥ श्रीनाभेय
जिनःवोयुष्मभ्यं श्रियंलक्ष्मीं दिशतु॥ किंविशिष्टःदेवः दीव्यतिक्रीडतिपरमानंदपदेइतिदेवः॥ यस्यभगवतः आग
मपदावली श्रीसिद्धांतपदपरंपरासतांसत्पुरुषाणां मोक्षमार्गंब्रूतेसिद्धेःपंथानंवदति॥ अन्यापिपदावलीमार्गंब्रूते॥
॥१॥ साधुशब्दार्थसंदर्भंगुणालंकारभूषितं॥ स्फुटरीतिरसोपेतंकाव्यंकुर्वीतकीर्तये॥२॥ साध्विति॥ कविःएवंवि
धंकाव्यं कीर्तयेयशसेकुर्वीतविदधीत॥ किंभूतंकाव्यं॥ शब्दश्चार्थश्चशब्दार्थौशब्दार्थयोःसंदर्भोरचना कैस
धुःप्रधानःशब्दार्थसंदर्भोयस्मिन्तत्तथा गुणैरौदार्यादिभिः अलंकारैश्चित्रादिभिःभूषितं॥ स्फुटाभिःप्रकटाभिः
रीतिभिर्गौडीयादिभिःरसैःशृंगारादिभिरुपेतंसहितं॥२॥ प्रतिभाकारणंतस्यव्युत्पत्तिस्तुविभूषणं॥ भृशोत्पत्ति
कृदभ्यासइत्याद्यकविसंकथा॥३॥ प्रतिभेति॥ आद्यकवीनांपुराणकाव्यकर्तृणांसंकथावार्ताशिक्षावाइ
तिवर्तते॥ इतीतिकिं॥ तस्यकाव्यस्यबुद्धिःकारणंस्यात्॥ तुपुनःव्युत्पत्तिरनेकशास्त्रपरिज्ञानंच॥ अभ्यासोऽभ्यस

प्रतिभा॥

Acc. NO. ~~889~~ M-1516
Title - वाग्भट्टालंङ्कार व्याख्या.
Author - ?
Date - ?
Subject - Rhetori अलंकारशास्त्र,
folio - 21.
Xerox - 42.

KKSU LIBRARY RAMTEK 441 106 M-1516 Dist. Nagpur

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१॥ नंभ्रूरोगप्रन्तिकृत् ।२॥ प्रोत्साहनकरी स्यात् ॥३॥ प्रसन्नपदनव्यार्थयुक्त्युद्बोधविधायिनी ॥ स्फुरंती सत्कवेर्बुद्धिः प्रतिभा
सर्वतोमुखी ॥४॥ प्रसन्नेति ॥ पूर्वमुद्दिष्टां प्रतिभां लक्षयति ॥ सत्कवेः प्रतिभा बुद्धिरुपलभ्यते ॥ किंभूता प्रसन्नानि स्फु
ललितानि पदानि नव्यानवीनाश्चार्थास्तेषां युक्तयस्तासां उद्बोधः परिज्ञानं तस्य विधायिनी कारिणी पुनः किंभूता
स्फुरंती स्फुरद्रूपा । अयमर्थः । सर्वतोमुखी सर्वत्र प्रसरणशाली ॥४॥ शब्दधर्मार्थकामादिशास्त्रेष्वाम्नायपूर्विका ॥
प्रतिपत्तिरसौ सम्यग्व्युत्पत्तिरभिधीयते ॥५॥ शब्दधर्मेति ॥ शास्त्रशब्दस्य प्रत्येकमभिसंबंधात् । शब्दशास्त्रं व्याक
रणं । धर्मशास्त्रं सिद्धांतादि अर्थशास्त्रं नीत्यादि कामशास्त्रं वात्स्यायनादि । एतेषां गुर्वाम्नायपूर्विका प्रतिपत्तिः परि
ज्ञानं व्युत्पत्तिरभिधीयते ॥५॥ अनारतं गुरूपांते यः काव्ये रचनादरः ॥ तमभ्यासं विदुस्तस्य क्रमः कोप्युपदिश्यते ॥६॥
अनारतमिति ॥ अनारतं निरंतरं गुरोः समीपे काव्यविषये रचनाया आदरः स्यात्तमभ्यासं विदुः कथयंति वि
द्वांसः इति शेषः ॥ तस्याभ्यासस्य कश्चिदपि क्रमः उपदिश्यते ॥६॥ बिभ्रत्या बंधचारुत्वं पदावल्या
र्थशून्यया ॥ वशीकुर्वीत काव्याय छंदांसि निखिलान्यपि ॥७॥ बिभ्रत्येति ॥ पदावल्या पदपरंपरया । अर्थशि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्यानि समस्तानि छंदांसि काम्यानि य कविः वशीकुर्वीत किंभूतस्या बंधने रचन माच्चारुत्वं मनोज्ञत्वं
विभ्रसादधसा। पुनरर्थे शून्यया रहितया। ७। मध्याद्रुत्वं संयोगाद्वि सर्गाणामलोपनं। विसंधिवर्जनंचे
निबंधचारुत्वहेतवः। ८। पूथ्यादिति। इति बंधचारुत्वहेतवो भवंति। इतीतिकं। संयोगा मध्यासाध्या
य लघुवर्णस्य गुरुत्वं क्रियते। विसर्गाणामलोपनं विद्धीत। विरुद्धसंधिकार्यस्य वर्जनं क्रियते इत्यादि। ७।
रीतकृपाणे। विधृते त्वया घोरे रणे कृते। अधीशक्षितिपाभीता वनेए वगता जवात्। ९। अत्रोदाहरणं।
रीतकृपाण इति। हे अधीश नृपते क्षितिपा राजानः भीताभयेन वनेए वगताः। कस्मिन्। त्वया शीते तीक्ष्णे खड्गे
विधृते धृते सति। पुनः घोरे रौद्रे रणे संग्रामे कृते सति। अधीशेति। संयोगइ धं नक्र्म्येण क्रियते। वनेए
येति [illegible] विसंधिर्ज्ञेयः। गता अत्र विसर्गाणां कृतं इधं न क्रियते। १०। अनुकूलस्य त्यां नम्यार्थयुक्ताव
भिनवत्वतः। अर्थसंकलनातत्व मभ्यसेत्सं कथास्वपि। १०। यथा। आगम्यतां सखे गाढमालिंग्यात्र निषी

3

दच॥ संदिष्टं यन्निजभ्रातृजामयातन्निवेदय॥११॥ अन्विति॥ संकथा सकवार्ता स्वप्यर्थसंकलना तत्वमर्थस्य योजना

॥२॥ तत्वमभ्यसेत्॥ कसति॥ नमार्थस्य प्ररास्यार्थस्य युक्तावनुह्लसंख्या मस्फुरंत्यां सत्यां कृत अभिनवत्वतः माथमि

कत्वान्नवीनत्वात्॥१०॥ यथा आगम्यतामिति॥ हेसखेहेमित्र आगम्यतां मार्गछुतु गाढंभृशमालिंग्यात्रनिषी

द॥ उपविश्य यन्निजभ्रातृजायया मम कलत्रेण संदिष्टं मनोगतं कथितं वृत्तं तत्सर्वं मनोज्ञं वं निवेदय कथय॥११॥

परार्थबंधाद्यभ्यस्यादभ्यासो वाच्यसंगतो॥ सनश्रेयान्यतोनेन कविर्भवति तस्करः॥१२॥ परार्थेति॥ वाच्य

संगतावर्थसंगतो परार्थबंधाद्यअभ्यासः स्यात्स अभ्यासो नश्रेयान्नोदयकारी॥ यतः कारणादनेनाभ्या श्रीशंकरवैद्य

सेन कविश्चोरः स्यात्॥ उक्तंच॥ परस्य काव्यंस्वमितिब्रुवाणो विज्ञायते ज्ञैरिह काव्यचौरः॥ विलोक्यमाणि

क्यमयोग्यहस्ते प्राहेति कोनामपदेत दस्य॥१२॥ परकाव्यग्रहोपिस्यात् समस्यायां गुणः कवेः॥ अर्थंतद

र्थानुगतं नवं हि रच्यते पुसो॥१३॥ परकाव्येति॥ परकाव्यस्य ग्रहः ग्रहणमपि समस्याविषये कवेर्गुणः ॥२॥

4

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यात्॥ हि यस्मात्कारणादसौ कविस्तदर्थस्यानुगतमनुयाति यिनं नवं नवीनं अर्थं रत्नमति॥ यथा
तपोधनस्य किं न स्यपलायस्य पलायुस्य। एवं तु क्रियते॥१३॥ मनःप्रसत्तिः प्रतिभा प्रातः कालोभियो
गिता॥ अनेकशास्त्रदृष्टित्वमित्यर्थालोकहेतवः॥१४॥ मन इति॥ अर्था वि लोकै इतिभवंति॥ इतीति किं॥ हेतवः३
मनःप्रसत्तिः प्रसन्नता स्वास्थ्यं विलोक्यते। प्रतिभा बुद्धिः प्रातःकालः प्रभातकालः॥ ३॥ अभियोगि
ताउद्यमवत्ता बहुशास्त्रावलोकित्वं विलोक्यते॥१४॥ समासामिव पूर्वां तु कुर्यादर्थप्रकाशनं॥ तत्पुरुष
बहुव्रीहीनमिथः प्रश्रयावहो॥१५॥ समासमितिः तस्य कास्य पूर्वां तु अर्थप्रकाशनं समासमिव कुर्यात्
अतो द्वितीय तृतीय पादयोः समासः॥ संधिश्च नस्यात्॥ तत्पुरुष बहुव्रीहि समासो मिथः परस्परं प्रश्रयावहो
नकार्यो॥ अत्र तत्पुरुषो बहुव्रीहिर्वा समास इति संदेहास्पदं न प्रयोक्तव्यं॥१५॥ एकस्यैवाभिधेयस्य समू
समासमेव च॥ अभ्यसेत्कर्तुमाधानं निःशेषालंक्रियास्कवा॥१६॥ एकस्यैवाभिधेयस्य वाच्यस्य वार्थस्य
समासं संक्षेपं व्यासं विस्तरं एवं निश्चयं कर्तुमभ्यसेत्॥ च पुनः निःशेषालंक्रियास्कः सर्वालंकारेषु एकस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सू

॥३॥ वाभिधेयस्य वर्णस्य वस्तुनः। आधानमारोपणं कर्तुमभ्यसेत्॥१६॥ स्यादन्नर्धांतपादांते प्यशिथिले लघुर्गुरुः॥
पादादौ नच वक्तव्याश्चादयः प्रायशो बुधैः॥१७॥ स्यादन्नर्धेति॥ लघुरपि गुरुः स्यात् क्व सति अशिथिले सति नि
बिडबंधे सति क्व अन्नर्धांतपादांते पि प्रथमं तृतीयपादांते अपिशब्दात् द्वितीयतृतीयचतुर्थपादांते॥ सर्वेषु
छंदस्सु गुरुर्लघुर्भवेत्॥ बुधैर्विद्वद्भिः पादादौ प्रायशो बाहुल्येन चादयः अव्ययरूपा न प्रयोक्तव्याः॥१७॥ भुव य
नानि निबध्नीयात् त्रीणि सप्त चतुर्दश॥ अप्पदृश्यां सतां कीर्तिमकीर्तिं च ततोन्यथा॥१८॥ भुवनानीति॥ श्रीः
भुवनानि जगंति त्रीणि अथवा सप्त चतुर्दश निबध्नीयात्॥ अन्यदृश्यामपि कीर्तिं यशः सितां धवलां निबध्नी
यात्॥ च पुनः अकीर्तिं ततः अन्यथा कृष्णां बध्नीयात्॥१८॥ वारणं शुभ्रमिंद्रस्य चतुरः सप्त वा बुधीन्॥ चत
स्त्रः कीर्तयेद्वाष्टौ दश वा ककुभः क्वचित्॥१९॥ वारणमिति॥ इंद्रस्य वारणं ऐरावतं शुभ्रमुज्वलं कीर्तयेत्॥ ॥३॥
अंबुधीन् चतुरः सप्त वा कीर्तयेत्॥ ककुभः दिशः चतस्रः अष्टौ वा क्वचित् दश दिशः कीर्तयेत्॥१९॥ श्रीः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यमकश्लेषचित्रेषु बवयोर्डलयोर्न भित्[ता]। नानुस्वारविसर्गौ च चित्रभंगाय संमतौ ॥२०॥ यमके सत्र स्कग
मं। न भित्[तिर्] न भेदः॥२०॥ शंकमाने महीपाल कारागारविडंबनं॥ त्वद्वैरिभिः सपत्नीकैः श्रितं बहुविडं बनं॥२१॥
शंकमानैरिति। हे महीपाल त्वद्वैरिभिर्वनमाश्रितं। वनं किं तैस्त्वद्वैरिभिः कारागारविडंबनं शंकमानैः गुरुतर
हांतःक्षेपणं विचिंतयद्भिः पुनः किं सपत्नीकैः सकलत्रैः। किंभूतं वनं। बहुबिलं बहूनि बिलानि सर्पकी
लकादिकुलानि यत्र तत्तथा। अत्र यमके वबयोर्डलयोरैक्यं॥२१॥ त्वया दयार्द्रेण विभो रिपूणां न केव
लं संयमिता न बालाः॥ तत्कामिनीभिश्च वियोगिनीभिर्मुहुर्महीपाल विधूसरांगाः॥२२॥ त्वयेति। हे विभो
हे राजेंद्र केवलं त्वया दयार्द्रेण सता रिपूणां बालाः स्त्रियः न संयमिताः न बद्धा इति न किंतु तत्कामिनी
भिः वियोगिनीभिः बालाः केशाः न संयमिता न बद्धाः। किंताः बालाः डिंभा बाके शोभ्य मुहुर्वारंवारं। मही
पाते न विधूसरं अंगं यासां ताः। अत्र श्लेषः बयोरैक्यं॥२२॥ देवपुष्मद्यशोराशिं स्तोतुमै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥८५ नंजडात्मकं॥ उल्कंठयति मांभक्तिरिंदुलेखेवसागरं॥२३॥ देवेति॥ अत्रश्लेषेउल्लेयोरैक्यंदर्शयति॥ हेदेवएनं
मांभक्तिरुत्कंठयति। किंकर्तुं युष्मदंघ्रिरागिस्तोतुं किंभूतं एनं जडात्मकं मूर्खं॥ कथं इंदुलेखेवसागरं यथा चंद्र
लेखा समुद्रमुत्कंठयति कंठादूर्ध्वं करोति वृद्धिमंतंकरोतीत्यर्थः॥ किंभूतं सागरं जलात्मकं जडंयं॥२३॥ चंद्रेडितं
चटुलिनस्वरधीतसारारत्नासनंरभसकल्मितरोककंजातं॥ पस्पामिपापतिमिरक्षयकारकायसत्वेंतरा
मलतपःकचलोपलोचं॥२४॥ चंद्रेडितमिति॥ अहं वीरं जिनं पस्पामि। कथं वीरं। चंद्रेडितं चंद्रेणईडितंस्तुतं॥
पुनःस्वःस्वर्गेअधीतं पठितंसारंबलं यस्यासौ स्वरधीतसारः इंद्रः रत्नेनखचितं आसनं रत्नासनं चटुलि
तंकंपितं। स्वरधीतसारस्यइंद्रस्यरत्नासनं एनैनसः। तथारभसेन वेगेन कल्मितंरोककस्यजातं एनेनस
तथा॥ तं पापमेवतिमिरं तस्यक्षयकारः कायोदेहोयस्यासौ तथा तं॥ अत्वादितराणि अत्वेतराणि बहू ॥८६॥
न्यमलानि तपांसि यस्यासौ तथा कन्यानां केशानां लोपाय स्तिमितलो यातेह्यते। यत्रकायेकच

8

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोपोलो-चोवायस्य ।अलोतरामलतपस्या।सो कच्चलोपलोन्चस्यअलोतरा ।। एतद्द्वारबंधचित्रं ।।२०।। प्रचंडबल्ल
निष्कामप्रकाशितमहागम ।भावतत्त्वनिधे देहेभालमहदुतंतव ।। प्रचंडेति ।। एतास्मिन्नेडलयोरभेदः ।। देहेऽस्मिन्
संसारेवातकक्षालोलकाटमुदुतंवर्तते ।। अत्रपाठांतरे ।। तवभाकांतिरदुलावर्तते ।। हेप्रचंडबल्ल प्रचंडंबलंयस्य
तस्यसंबोधनं ।हेनिष्कामकंदर्परहित ।हेप्रकाशितमहागम ।प्रकाशितामाहात्मागमःश्रीसिद्धांतोयेनसतथा ।।
हेभावतत्त्वनिधे अंतरंगतत्त्वनिधानउत्कमहसर्थी ।।२१।। छत्रबंधचित्रं ।। भवकाननमत्तेभभग्नमायातमप्रद ।।
विनयात्वांस्तुवेवीरविनतत्रिदशेश्वर ।।२२।। भवकाननेति ।। अत्रचित्रेबवयोरैक्यं ।। हेवीरत्वांविनयात्स्तुवे ।।
शेषंसुगमं ।। इतिद्विदंडछत्रबंधचित्रं ।।२६।। अथोपसर ।। त्राण्यभियोगयोगादभ्यासवत्साम्यपदप्रपंचः ।।
ततोनिदित्वासमयंकवीनांमनःप्रसत्तौकवितांविदध्यात् ।।२७।। इतिवाग्भटालंकारेप्रथमःपरिच्छेदः ।। अथो
र्येति ।। कविःकवितांविदध्यात् ।। कविरिसर्धसाम्याद्गम्यते ।। किंकृत्वा अभियोगादुद्यमस्पसंयोगात् ।। शा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राकृतं २

स्थाणपथीसपठित्वा। किंभूतः कविः अभ्यासेन वश्यः वशीभाभ्यः अर्थपदप्रन्चोपेयस्पसतथा। पुनः किंकृत्वा तं तंम
सिद्धं कवीनां समयं शास्त्रंविदित्वा। क्कसतिमनःप्रसन्तेसस्सां। चित्तनिर्मलितायांसत्यां ॥२७॥ इतिवाग्भटालंका
रप्रथमपरिछेदे अवचूरिःसंपूर्णा॥१॥ ॥संस्कृतंतस्यापभ्रंशरोप्राकृतभाषितं॥ इतिभाषाचतस्रोपियां

शरीरतां ४ तिकाव्यस्यसंकथा॥१॥ इतिचतस्रोपिभाषाःतस्यकाव्यस्यवृत्तस्यकायतांशरीरतांयांति॥ इतीतिसंस्कृतमि

स्ले ५ सादि॥१॥ संस्कृतंस्वर्गिणांभाषाशब्दशास्त्रेषुनिश्चिता॥ प्राकृतंतज्जन्तनुल्यदेशादिकमनेकधा॥२॥श्रीः
स्वर्गिणांदेवानां भाषासंस्कृतं कथ्यते॥ प्राकृतमनेकधाबहुधाभवति। तज्जंतस्मात्संस्कृताज्जातंशुद्धप्रा
कृतामिसर्पः॥ तेनसंस्कृतेनतुल्यं संस्कृतसमभिसर्पः॥ आदिशद्वाच्छूरसेनीमागध्यौ॥२॥ अपभ्रंशस्तु
तच्छुद्धं तत्तद्देशेषुभाषितं॥ यद्दूतैरुच्यते किंचित्तद्दौतिकमितिस्मृतं॥३॥ तत्तद्देशेषुयच्छुद्धंभाषितंभा
षितंभवतिसअपभ्रंशः स्यात्॥ यत्किंचिद्दूतैःपिशाचैरुच्यतेतद्दौतिकंपैशाचिकंस्मृतं॥३॥ छंदोनि ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बद्धमच्छंदइनितद्वाभयंद्विधा॥ पद्यमाद्यंतदन्यच्चगद्यंमिश्रंचतद्द्वयं॥ इत्यमुनाप्रकारेणतद्वाङ्मयंशास्त्रं
धा२ द्विविधंभवति॥ एकंछंदोनिबद्धं१ द्वितीयमछंदः२ आद्यंछंदोनिबद्धंपद्यमुच्यते चपुनः तदन्यछंदःगद्यमु
च्यते॥४॥ अदुष्टमेवतत्कीर्त्यैस्वर्गसोपानपंक्तये॥ परिहार्यानितोदोषान्तानेवादौप्रचक्ष्महे॥५॥ तत्का
व्यमदुष्टमेवनिर्दुष्टमेवनिर्दोषमेवतत्कीर्त्यैयशसेभवति॥ किंभूतायैकीर्त्यैस्वर्गस्यसोपानपंक्तिस्तस्यै॥
अतःकारणात्तानेवादौदोषान्आदौप्रथमंप्रचक्ष्महेजल्पामः॥५॥ अनर्थकंश्रुतिकटुव्याहतार्थ
मलक्षणं॥ स्वसंकेतप्रकृतार्थमप्रसिद्धमसंमतं॥६॥ ग्राम्यंयच्चप्रजायेत पदंतन्नप्रयुज्यते॥ क्वचिज्जद
द्विषांचविदुद्दिरेतेषामप्यदोषता॥७॥ युग्मं॥ यत्पदमनर्थकंप्रजायेतकविभिस्तत्पदंनप्रयुज्यते॥
एवंसर्वत्रयोज्यं॥ क्वचिद्विद्वद्भिरेतेषामनर्थकादिदोषाणामप्यदोषताइष्टाईप्सिता॥७॥ अस्कृते
ऽनुपयुक्तंयत्तदनर्थकमुच्यते॥ यथाविनायकंवंदेलंबोदरमहर्दितं॥८॥ अस्कृतेअस्तावापन्नयद उ२
नुपयुक्तंअनुपयोगिभवतिनिःप्रयोजनंभवतितदनर्थकदूषणंउच्यते॥ यथेत्युदाहरणोपन्या

11

॥६५॥ सो। अहंविनायकंवंदे। लंबोदरमितिनामांतरमनर्थकं॥ हितुइतिच॥ अनर्थदूषणमुच्यते॥ ८॥ निष्ठुरा
क्षरमसंतं बुधैः श्रुतिकटुस्मृतं॥ एकाग्रमनसामन्ये स्रष्ट्रेयं निर्मितामता॥ ९॥ यसदंत्र संतां निष्ठुराक्षरं
कठोराक्षरं स्यात् बुधैर्विद्वद्भिस्तासदं श्रुतिकटु कर्णदुःसहंस्मृतं कथितं॥ यथा अहंएवंमन्ये इयं कांचिन्म
नोहरा स्त्री स्रष्ट्रा विधात्रा एकाग्रमनसासावधानेनचेतसा सतानुनिश्चयेन निर्मितामनोहरत्वात्॥
अंत्रस्रष्ट्रेय निष्ठुराक्षरदोषः॥ ९॥ व्याहतार्थंयदिष्टार्थबाधकार्थांतराश्रयं॥ एतस्य भेयभूपाल
भूतलोपकृतौ सदा॥ १०॥ इष्टार्थंप्रतिपादयितुमीस्पितार्थस्तस्य बाधकं यदर्थांतरं तदाश्रयं
तत्प्रतिपादकं पदं व्याहतार्थमुच्यते॥ यसदामि ष्टार्थतादृशं दुर्मर्थांतरं त्याभिधत्ते तद्व्याहतार्थमिति भा
वः॥ हे भूपाल भूतलस्योपकृतौ पृथ्वीतलस्योपकारे त्वमेवरतइतिराज्ञार्थः॥ अथ अन्यभूतानां प्राणिनां लोपोमार ॥६५॥
णंतस्यकृतौ करणे त्वमेवरतइत्यनिष्टार्थः॥ १०॥ दुरुस्त्वविरुद्धंयत्तल्लक्षणमुच्यते॥ मानिनीमानदलनो यथैं
दुर्विजसत्तौ॥ ११॥ यसदं सादुरुस्त्वस्य आकरणस्य विरुद्धं स्यात् तसदमलक्षणमुच्यते॥ यथे दुश्चंद्रमाविजयति॥ श्री ॥५

किं भूतः मानीनिनां सगर्वस्त्रीणां अहंकारविध्वंसकः॥ अत्र विपराभ्यां जे इति आकरणसूत्रेण। मनेपदे प्राप्ते विजयते इति परस्मैप
दप्रदानमिति व्याकरणविरुद्धं॥ ११॥ स्वसंकेतप्रकृतार्थं ज्ञेयार्थांतरवाचकं॥ यथा विभाति शैलोयं पुष्पितैर्वनिरध्वजैः॥ १२॥
सं तस्वसंकेतप्रकृतार्थदूषणं स्यात्। ज्ञेयात् प्रतिपाद्याद्यदर्थांतरं भिन्नोर्थस्तस्य वाचकं यत्पदं भवति। यथायं शैलः पर्वतः पुष्पि
तैर्वानिरध्वजैरर्जुनवृक्षविशेषैर्विभाति॥ अत्र ज्ञेयोर्जुनवृक्षविशेषः। तस्मादर्थांतरं पांडवोर्जुनस्तस्य वाचकं वान
रध्वजेतिपदं न पुनरर्जुनवृक्षस्य। ततः स्वसंकेतप्रकृतार्थमिदं॥ १२॥ यस्मिन्नास्ति प्रसिद्धिस्तदप्रसिद्धं विदुर्बुधाः॥
राजेंद्र भवतः कीर्तिश्चतुरो हंति वारिधीन॥ १३॥ यस्य शब्दस्य यस्मिन्नर्थे प्रसिद्धिर्नास्ति विद्वांसः तदप्रसिद्धं विदुः॥
यथा हे राजेंद्र भवतस्तस्य कीर्तिश्चतुरो वारिधीन् समुद्रान् हंति॥ अत्र हनहिंसागत्योरिति येनैनधातुना हंतेः सिद्धं
संपन्नोपि गमनार्थे प्रसिद्धत्वान्न गमनार्थप्रयोगः॥ १३॥ शास्त्रमपार्थमाख्यातुं यन्न सर्वत्र संमतं॥ असंम
तं तमोंभोजं क्षात्रं यं संशयोरवेः॥ १४॥ अर्थमाख्यातुं वक्तुं शास्त्रं समर्थमपि यत्सर्वत्र शास्त्रेषु संमतं न स्यात्तद

13

न२

संमतं॥ यथे यथा हारः। रवेः सूर्यस्यांशवः किरणास्तमोंभोजमंधकारकर्दमं क्षालयंति॥ अंभसः पानीयाज्जा

२ मुमत्न तैमंभोजं कर्दममिश्रं स सौ मिलति॥ परंबिंदुर्द्विरंभोजशब्दः कमलविषये कथितः संमतेोन पंके॥१४॥ यद्यत्रानु

चितं तद्धि तत्र ग्राम्यस्मृतं यथा॥ छादयित्वा सुला सुष्वेः पुरो धान्यं क्षिप पाम्यहं॥१५॥ यद्यत्र स्थानेऽनुचितं

अयोग्यं तद संमतं ग्राम्यं स्मृतं॥ यथाऽत्र छादयित्वाऽसनुचितं पूजयामिले तियोग्यं। पुनः धान्यं क्षिपामी यप्प

कली५ युक्तं उपढौकरोमीतियुक्तं॥१५॥ पदात्मकत्वाद्वाक्यस्य तद्दोषाः संति तत्रहि॥ अपदस्थास्तु ये वाक्यदोषास्तु ऋ५

ब्रूमहे वयं॥१६॥ यत्र वाक्ये तद्दोषाः पददोषाः संति कुतः वाक्यस्य पदात्मकत्वात्॥ पदसमूहो वाक्यं कथ्यते॥

तथा ये तु दोषाः अपदस्थाः पदेष्ववर्तमाना वाक्यदोषा भवंति॥ अधुना सांप्रतं दोषान् ब्रूमहे॥ जल्पामः॥१६॥

खंडितं व्यस्तसंबंधमसंमितमपक्रमं॥ छंदोरीतियतिभ्रष्टं दुष्टं वाक्यमसत्क्रियं॥१७॥ एवंविधं खंडि

तादिकं वाक्यं दुष्टं भवति॥१७॥ वाक्यांतरप्रवेशेन विच्छिन्नं खंडितं मतं॥ यथा पातु सदा स्वामी यमिंद्रः॥ ६ग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तौति वो जिनं ॥१८॥ वाक्यमुक्तिरंतराले ऽन्यवाक्यप्रवेशेन विछिन्नं तत्खंडितं स्यात् ॥ यथा जिनः स्वामी नो युष्मा
न्पातु ॥ इदं मुख्यवाक्यं ॥ इंद्रः यं जिनं सदा स्तौति इदमपरं वाक्यांतरं ॥१८॥ संबंधपद दूरत्वे व्यस्तसंबंधमुच्यते ॥
यथार्द्धः संपदं ज्ञाता देयात त्वानि वार्हतां ॥१९॥ परस्परसंबंधिनां पदानां दूरत्वे सति व्यस्तसंबंधं कथ्यते ॥
यथार्हतामाद्यः श्री वृषभः वो युष्माकं संपदं देयात् ॥ कथंभूत अर्हतामाद्यः तत्वानि ज्ञाता ॥१९॥ शब्दार्थौ यत्र न
तुला विधृताविव संमतो ॥ तदसंमितमित्याहुर्वाक्यं वाक्यविदो यथा ॥२०॥ यत्र शब्दार्थौ तुला विधृताविव
संमतौ तुल्यमानाविव न भवतः ॥ यथा विधृते वस्तुनि संमिते भवतः यत्र तथा शब्दार्थौ समानेन न भवतः ॥ तद्वाक्य
वाक्यविदो विद्वांसः असंमितमित्याहुः ॥२०॥ मानसौकप तद्योन्नैदेयासन्न विलोचनः ॥ तमो रिपुविपक्षाग्रि श्रियं
दिशतु वो जिनः ॥२१॥ जिनः वीतरागः वो युष्मभ्यं तमसो ऽधकारस्य रिपुः सूर्यः तस्य विपक्षो राहुस्तस्य राहुदेः यस्य
शिर्विघुस्तस्य विपक्षोः श्रियं लक्ष्मीं दिशातु ॥ किंलक्षणो जिनः मानसमानैः सरोवरे ओकः गृहं यस्य सामान

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥६॥ सोकः सचासौ पतत्त्रश्च पक्षीराजहंसः सएवयानं वाहनं यस्य सचासौदेवश्च ब्रंह्मातस्यासनं कमलंतद्दृष्टिशिष्टे
लोचनेयस्यसः॥२१॥ अपक्रमं भेदव्रतमपिदुःक्रमं लधनं॥ यथागुरूकाकुत्स्थानोगुरून्देवांश्चवंदते॥२२॥
तदपक्रमं गतानुक्रमं भवेत्॥ यत्र भासेदुःक्रमं लंघनं क्रियते॥ यथास्त्रात्वादेवान्पूजयित्वागुरूंश्चवंदिता भो
क्रममितिक्रमः॥२२॥ छंदःशास्त्रविरुद्धंयच्छंदोभ्रष्टं हितद्यथा॥ सजयतिजिनपतिः परब्रंह्ममहानिधिः॥
॥२३॥ यत्काव्यं छंदःशास्त्रविरुद्धं भवति॥ हिनिश्चितं तच्छंदोभ्रष्टं कथ्यते॥ यथासजिनपतिर्जयति॥ श्री:
अथवाजयतु॥ किंभूतः परमब्रंह्मस्वरूपस्यमहानिधिः॥ अत्रश्लोके तृतीयपदे पंचमं लघुसर्वत्रइत्यादिश्लोक
छंदोलक्षणंनास्ति॥२३॥ रीतिभ्रष्टमनिर्वाही यत्ररीतेर्भवेद्यथा॥ जिनोजयतिसाश्रिमानिंद्राद्यमरवंदितः॥२४॥
यत्रपद्येप्रारब्धायावैदर्भी रीतिर्गौडीयारीतिमधुराया रीतेरनिर्वाहीभवेत्॥ तद्रीतिभ्रष्टं स्यात्॥ श्री:
यथासश्रिमान्जिनोजयति किंभूतसइंद्राद्दिदेववंदितः॥ यथात्रप्रथमपदेऽसमस्तपदत्वाद्वैदर्भी॥७॥

16

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृर्भ ~~द्वीभिम~~रीतिः द्वितीयपादेष्भूयः समासवला द्रोडीपारीतिः॥२४॥ पदांत॥द्विरतिमोर्तकंयतिभिष्टंबुधैर्मिया॥
नमस्तस्मैजिनस्वामिनेसदानेसतेनमयेर्हते॥२५॥ विभ तमंतंपदंपदांतःपदमध्येविरतिर्यत्रतद्भूलदंपदांतवि
रतिःस्यात॥ बुधस्तद्यतिभ्रष्टंभोर्तकं॥ यथातस्मैनमःपनमः॥ किंभूतायतस्मैजगतांस्वामिनेनाथाय॥पुनःअर्ह
तेपूज्याय॥अत्रस्वामिनेपदंपदमध्येचयतिःक्षतिःकृता॥२६॥ सत्क्रियापदहीनंयत्तदसत्क्रियमुच्यते॥यथा
सरस्वतीपुष्पैःश्रीखंडैर्धुस्टणैस्तवैः॥२७॥ यत्काव्यंसत्क्रियापदेनविहीनंस्यात॥तत्काव्यमसत्क्रियापदमुच्यते॥८
यथाहंसरस्वतींदेवीपुष्पैःश्रीखंडे~~धुस्टणैस्तवैः~~॥ श्रीखंडैःधुस्टणैःकुंकुमैःस्तवैःस्तोत्रैरन्नाचर्मीतिक्रि
याविलोक्यते॥२८॥ देशकाल॥२गमावस्था॥४ द्रव्यादिषुविरोधिनः॥ वाक्यमर्थेनवध्नीयाद्विशेषंका
रणंविना॥२९॥ सुधीः काव्येषुएवंविधानर्थान्नबध्नीयात॥किंभूतान्देशकालादिषुविरोधिन इत्यादि
विशेषरूपंकारणंविना॥२९॥ प्रवेशेन्येत्रस्पस्फुरत्कुटजरा॥ जिस्मितदिशिप्रचंडेमार्तंडेहिमकण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१९॥ समन्नोभ्रमहसि॥ जलक्रीडायातंमरुसरसिबालद्विपकुलंमदेनांधंविध्वंस्यसमशरपातैःप्रशा
मिनः॥२८॥ प्रशामिनेमालमानः असमशरपातैः निरूपमबाणप्रहारैर्बलिद्विपकुलंकलभस
मूहंकरिपोतमरेविध्वंसिति इत्यागमविरुद्धं॥७॥ कसतिचैत्रमासस्यमधरौसनति। किंविशिष्टेमधरौ
स्फुटंविकसिताः कुटजावृक्षविशेषास्तेषांराजिः परंपरातयास्मिताहसिता दिशोयस्मिन्नसतथा
इतिकालविरुद्धं५ पुनः कसतिमार्तंडेसूर्यंमचंडेसति। किंभूतेसूर्ये। हिमानांकणास्तैःसमानभूप्र
तापोमहश्चतेजोयस्यतस्मिन्नद्रव्यविरोधीदं॥३॥ किंभूतंद्विपकुलंमरुस्थलीसरोवरजलक्रीडार्थं
समागतंदेशविरुद्धमिदं४ पुनःकिंभूतंमदेनांधंअवस्थाविरुद्धमिदं॥५॥२८॥ अस्यक्षोणिपतेः ॥१९॥
पराद्धपरयालक्षीकृताः संख्ययाप्रज्ञाचक्षुरवेक्ष्यमाणतिमिरप्रख्याः किलाकीर्तयः॥ गायंतेस्वर
मष्टमंकलयता जातेनवंध्योदरान्मूकानांप्रकरेणकूर्मरमणीदुग्धोदधेरोधसी॥७॥२९॥ श्री...पंद्५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथविशिष्टकारणसद्भावेसतिविरुद्धानप्यर्थान्निबध्नीयादितिदर्शयन्ति॥ यथानैषधकाममध्ये॥ अस्य
क्षोणिपतेररिसादकिलेयहंसंपादयामि॥ अस्यक्षोणिपतेर्भूपतेरकीर्तयो ऽपयशांसिमूकलोकानामर्था
द्वैकल्पानांप्रकरेणसमूहेनगीयंते। कीदृश्यअकीर्तयःपरार्द्धंसर्वोत्कृष्टासंख्यातताेऽपिपरस्यामुत्कृष्ट
संख्ययालक्षीकृताः तथाप्रज्ञाचक्षुर्भिर्योगिभिरवेक्ष्यमाणांविलोकयमानंयन्निर्मिरंतलसख्याति संख्या।
अतिमलिनेयर्थः किंभूतेनमूकानांप्रकरेणयंध्यादरोऽज्ञातेन। क्वगीयंतइत्याह। कूर्मरमण्याः कच्छप्याःयद्दुग्धं
पयस्तस्यादध्येःसमुद्रस्यरोधसितटे। अत्रमूकानांप्रकरस्यगानमयुक्तंपराध्येंक्षिशासंख्येयनास्ति॥
कयालक्षीक्रियंतेअकीर्तयस्तेनकिंकुर्वता ऽपमस्वरकल्पयतादाति॥ गानेसत्येवस्वरानाष्टमर्यादि कल्प्य
तेकूर्मरमण्यादुग्धमेवनास्ति कुतस्योदधिः कुत्रतत्तटमेनकेहेतुनाकाव्येरतिवर्तिका॥ अस्यराजेंद्रस्या
कीर्तयः संसेवनकेनचिदुद्गीर्यंतइति॥२८॥ इतिदोषविषयानिषकैरकलंकितमुज्ज्वलंसदापि।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविहृदयसागरोत्थितममृतमिवास्वाद्यते काव्यं ॥३०॥ इति द्वितीयः परिच्छेदः॥ इतीति॥ सदा सर्वदा विबुधैः

विद्वद्भिः काव्यममृतमिवास्वाद्यते किंभूतं इति पूर्वोक्तदोषास्त एव विषाणि एषां तेषां निषेकैः सिंचनैर्मि

श्रीभावेरकलंकितमदूषितमुज्ज्वलं निर्मलं कवीनां हृदयमेव सागरस्तस्मादुत्थितममृतमपि विषा

ऽकलंकितं विबुधैर्देवैरास्वाद्यते उज्ज्वलं च भवति सागरोत्पन्नं च॥ इति द्वितीयः परिच्छेदः॥ अदोषावपि

कि ५ शब्दार्थौ प्रशस्येते न यैर्विना॥ तानिदानीं यथाशक्त्या ब्रूमोऽभिव्यक्तये गुणान्॥१॥ इदानीं सांप्रतं यथायु

क्तयथाशक्ति तान् गुणान् ब्रूमः कथयामः॥ किमर्थमभिव्यक्तये प्रकटीभावाय यैर्गुणैर्विना अदोषौ

निर्दोषावपि शब्दार्थौ न प्रशस्येते॥१॥ औदार्यं समता कान्तिरर्थव्यक्तिः प्रसन्नता॥ समाधिः श्लेष ओजो

थ माधुर्यं सुकुमारता॥२॥ औदार्यादीनां गुणानां क्रमेण दश नामानि ज्ञातव्यानि॥२॥ पदानामर्थचा 1905

रुत्वप्रत्यायकपदान्तरैः॥ मिलितानां यदाधानं तदौदार्यं स्मृतं यथा॥ अथ चैतेषामौदार्यादीनां गुणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नांलक्षणोदाहरणेक्रमेणाह॥ पदानामित्यादि॥ तदौदार्यगुणः स्मृतः एदं वं विधानांपदानां आधानं भणि
तं क्रियते किंभूतानांपदानामर्पस्योत्कवस्त्कनश्चारुत्वप्रधानत्वप्रसायकैः पदांतरैर्मिलितानां मिश्रीकृतानां॥
॥३॥ गंधेनविभ्राजितधामलक्ष्मीलीलांबुजछत्रमपास्यराज्यं॥ क्रिडागिरौरैवतकेतपांसिश्रीनेमिनाथो
त्रचिरंचकार॥४॥ औदार्यस्योदाहरणंदर्शयति॥ अत्ररैवतकेश्रीगिरिनारिस्पर्वतेश्रीनेमिनाथः चिरंतपां
सिचकार कृतवान् किंभूतैरैवतेक्रीडायोग्यगिरौ॥ किंकृत्वाराज्यमपास्यसक्त्वा किंभूतंराज्यंगंधेभैर्गं
धहस्तिभिर्विभ्राजितंधामगृहंयस्मिन्तत्तथा॥ पुनर्लक्ष्म्यालीलांबुजमिवछत्रंयस्मिन्तत्तथा अत्रगंधरा
ह्वेनभानांचारुत्वंप्रतिपादितं। क्रीडाराह्वेनचारुत्वंप्रतिपादितं॥४॥ बंधस्ययद्वैषम्यंसमतासोच्य
ते बुधैः॥ यदुज्वलत्वंतस्यैवसाकांतिरुदितागुणः॥५॥ यद्बंधस्यावैषम्यंभवतिसाबुधैः समतोच्य
ते॥ यत्तस्यैवबंधस्योज्वलत्वंभवतिउद्दृढत्वंस्यात्साकांतिर्नामगुणः स्यात्॥५॥ कुचकलशादि
सारिस्फारलावण्यधारामनुवदतियदंगासंगिनीहारवल्ली॥ असद्दशामहिमानंतामनन्योपमेयाकथ

॥११५ यकथमहंतेचेतसिमजयामि॥६॥समतायामुदाहरणमाह॥केनचि॥न्मित्रेणकस्याश्चिदद्दष्टरूपायाः
स्वरूपमवलोकनायस्यमित्रःप्रहितःसचतांदृष्ट्वाग्रस्यागात्तेनचसदृष्टःसाकीदृशीतिसआह॥हेमित्र
त्वंकथ्यतां॥स्त्रियंचतवचेतसितवहृदयेकथंअंजयामिप्रकटीकरामिकिंभूतामसदृशांनिःसीमानंम
हिमानं॥नान्येवनेवस्तुनाउपमेयाअनन्योपमेयांतांकांयस्याअंगंयदंगप्रस्तावाद्धृदयंतस्यासंगिनी
हारवल्लीलतास्तनघटाभ्यांनिःसरंतीलावण्यधारामनुवदसनुकरोति॥६॥फलैःकृतोहारःप्रथम
मपिनिर्गत्यसदनाद्वनासक्तःसोरण्येक्वचिदपिपुराजन्मनिकृती॥तपःसन्नश्रांतैननुपनभुविश्रीफलदलै
रखंडैःखंडेदोश्वरमकृतपादार्चनमसौ॥७॥अथकांतिगुणस्योदाहरणमाह॥असौकृतीपूर्वजन्मनि
खंडेंदोरीश्वरस्यश्रीफलदलैर्बिल्ववृक्षविशेषपत्रैरखंडैःसंपूर्णैःश्वरपादार्चनमकृतअकार्षीत्॥श्रीः
किंभूतःकृतीबाल्येएवसदनाद्गृहाद्वासा॥न्निर्गत्यफलैःकृताहारंकृताहारं॥पुनःकिंभूतःक्वचिदपिसां ॥११५
सारिकेसोरण्येऽनासक्तअस्माकंकःमूढःकिंकुर्वन्नश्रांतंनिरंतरंतपःसन्नतपःकुर्वन्॥रचनाया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उद्धृटत्वात्कांतिरियं ॥३।७॥ यदनेयत्वमर्थस्यसार्थव्यक्तिः स्मृतायथा॥ त्वेसेन्यरजसालुप्तेसूर्येरात्रिर
भूद्दिवा॥८॥ यदर्थस्यवस्तुनः अनेयत्वंस्फुगमत्वं ।नेयत्वंगम्यत्वं॥ यत्रानुक्तोप्यर्थबलाद्गम्यतेतदर्थस्यनेयत्वं
मनाम यत्वमेतावतार्थस्ययत्राक्षरैरेवप्रतिपादनं सा अर्थव्यक्तिर्नेया॥ अथोदाहरणमाह॥ हेराजेंद्रत्वसे
नारेणुनासूर्येलुप्ते आच्छादितेसति दिवारात्रिरभूद्दृज्जनि॥ ८॥ स्फुटिसर्थापिकित्वंयत्प्रसत्तिः सोच्यतेयथा॥
कल्पद्रुमइवाभातिवांछितार्थप्रदोजिनः॥ ९॥ यत्स्फुटितिशीघ्रं अर्थापिकत्वंस्फुबोधत्वंसाप्रसत्तिः प्रसन्नताउ
च्यते ॥ उदाहरणं॥ जिनःकल्पद्रुमइवाभातिशोभते॥ किंभूतः। वांछितार्थफलप्रदः॥ कल्पद्रुमोपिवांछितार्थ
फलप्रदोभवति॥ ९॥ ससमाधिर्यदन्यस्यगुणोन्यस्यनिवेश्यते॥ यथाश्रुभिररिस्त्रीणांराज्ञः पल्लवितंयशः॥ १०॥
यदन्यस्यवस्तुनःधर्मः अन्यवस्तुनिवेश्यतेससमाधिः॥ उदाहरणं॥ अरिस्त्रीणांअश्रुभिर्नृपस्ययशः पल्लवितं
पल्लवनंहिलताधर्मः सचयशसिनिवेश्यते॥ १०॥ श्लेषोयत्रपदानिस्युःस्यूतानीवपरस्परं॥ ओजःसमास
भूयस्त्वंतद्दृढ्ये प्रतिकंदरं॥ ११॥ यत्रपदानिपरस्परंस्यूतानिविस्मोतानीवस्युः एतावतासमासानीवस्युः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सश्लेषोज्ञेयः॥समासभूयस्त्वंसमासबहुलत्वं।ओजोगुणोज्ञेयः
तदोजःगद्यस्यातिसुंदरं अतिशोभावहंभवति।११।मुदायस्योद्गीतंसहसहचरीभिर्वनचरैःमुहुःश्रुताहेलो
द्धृतधरणिभारंभुजबलं।दरोद्गच्छद्दूर्वांकुरनिकरदंभात्पुलकितास्यचमत्काराद्रेकःकुलशिखरिणस्तेपिदधिरे॥१२॥
उदाहरणमाह।तेपिकुलशिखरिणःकुलाचलाश्चमत्कारणाश्चर्येणोद्रेकंउल्लासंदधिरे।धृतवंतः।किंकृत्वा
यस्यभूपस्यभुजबलंश्रुत्वा।किंभूतंभुजबलंसहचरीभिःकामिनीभिःसहवनचरैर्मुदाहर्षेणोद्गीतं।पुनःलीला
द्धृतपृथ्वीभारंकिंभूताःशिखरिणः।पुलकितारोमांचितादरईषदुद्गच्छद्भिःसरंतोयेदर्भांकुरास्तेषांसमूह
स्तस्यदंभाच्छलात्॥१२॥गद्यंसमराजिरस्फुरदरिनरेंद्रकरिनिकरशिरःसरससिंदूरपूरपरिचयेनेवारुण
करतलोदेवइति॥१३॥अयंगद्ये ओजोगुणंदर्शयति।संग्रामांगणेस्फुरद्भिरिनरेंद्राणां हस्तिसमूह ॥१२॥
कुंभस्थलावलंबिससरसिंदूरपूरस्यपरिचयेनेवारक्तभूतहस्तोजयसिंहदेवोजयति॥१३॥प्रसरं
सार्थपदत्वं यत्तन्माधुर्यमुदाहृतं।अनिष्ठुराक्षरत्वंयत्सौकुमार्यमिदंयथा॥१४॥यदर्थस्यपदानां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चसरसत्वंमधुरत्वंभवतितन्माधुर्यमुक्तंबुधैः॥यदनिष्ठुराक्षरत्वंस्कोमलाक्षरत्वंभवतितदिदंसोकुमार्यंक
थितं॥१४॥फणिमणिकिरणालीस्यूतचंचन्निचोलकुचकलशनिधानस्यवरक्षाधिकारी॥उरसिविशद
हारस्फारतामुज्झिहानःकिमितिकरसरोजेकुंडलीकुंडलिन्याः॥१५॥अथमाधुर्योदाहरणंदर्शयति॥
कुंडलिन्याःपद्मावत्यादेव्याःकरसरोजेकुंडलीसर्पःकिमितिकिमर्थंकिंभूतःकुंडलीफणरत्नकांतिश्रेण्यास्यू
तःप्रोतःलक्षणयाआप्तःचंचलधानःनिचोलःकंचुकोयेनसतथा॥उरसिहृदयेविशदहारस्फारतां
निर्मलहारपद्धतिस्तीर्णतांउज्झिहानःत्यजन्भवति॥तर्हिकुचकलशनिधानस्यरक्षाधिकारी
इवस्यात्॥नहृदयेयुज्यतकरकमलेकिमितिसंदेहः अत्रपदानामर्थस्यचमाधुर्यं॥१५॥प्रतापदीपांजनराजिरेव
देवत्वदीयःकरवालएषः॥नोचेदनेनद्विषतांमुखानिश्यामायमानानिकथंकृतानि॥१६॥अथसोकुमार्यो
दाहरणंदर्शयति॥हेदेवएषत्वदीयःकरवालःखड्गःप्रतापदीपस्यांजनसमूहएवचेद्यद्ययंकरवालअंज
नराजिरूपएवनोतदा।अनेनखड्गेनद्विषतांवैरिणांमुखानिश्यामायमानानिकथंविहितानि॥१६॥गुणेरमीभिः
ना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ठ

परितेरनुविद्धं मुक्ताफलानामिव दामरस्य ॥ देवीसरस्वत्यपि कंठपीठं करोत्यलंकारतया कवित्वं ॥१७॥ इति तृतीयः परिच्छेदः ॥ ।
अथ सर्वेषां गुणानां स्कृ भगत्वमाह ॥ देवी सरस्वत्यपि कवित्वमलंकारतया अलंकारहेतवे कंठपीठं करोति ॥ कंठेनो
ध्वरतीतिभावः किंभूतं कवित्वं अमीभिः पूर्वोक्तैर्दशभिर्गुणैः परितः सामस्तेनानुविद्धं सहितं किमिव मुक्ताफलानां
दामेव ॥ तदपि दामगुणैर्दोरकैरनुविद्धं शोभंस्यात् अलंकारं च कंठे क्रियते ॥१७॥ इति टीकायां तृतीयपरिच्छेदावचूरिः ॥३॥
दोषैर्मुक्तं गुणैर्युक्तमपि येनोज्झितं वचः ॥ स्त्रीरूपमिव नो भाति तं ब्रूवेलंक्रियाच्चयं ॥१॥ अहं तं अलंक्रियाणां उच्चयं
समूहं ब्रूवे ॥ येनालंकारसमूहेनोज्झितं रहितं वचो वचनं न भाति न शोभते ॥ किंभूतं वचः दोषैरनर्थकादिभिरष्ट
भिर्मुक्तमपि किमिव । स्त्रीरूपमिव यथा स्त्री रूपं दोषे व्रणादिभिर्मुक्तं गुणैः सद्गुणादिभिर्युक्तं अपि येन अलंकारसमू ॥१३१॥
हेन विना न भाति ॥१॥ १ चित्रं १ वक्रोत्य २ नुप्रास ३ यमक ४ ध्वन्यलंक्रियाः ॥५॥ अथार्थालंकृतयो जातिरुपमा रूपकं
तथा ॥२॥ प्रतिवस्तूपमा भ्रांतिमानाक्षेपोथ संशयः ॥ दृष्टांत व्यतिरेकौ चापह्नुतिस्तुल्ययोगिता ॥३॥ उत्प्रेक्षा ले ३
र्थांतरन्यासः समासोक्तिर्विभावना ॥ दीपकातिशयो हेतुः पर्यायोक्तिः समा हितं ॥४॥ परिवृत्तिर्यथासंख्य
विषमः ससहोक्तिकः ॥ विरोधोवसरः सारः संश्लेषश्च समुच्चयः ॥५॥ अप्रस्तुतप्रशंसा स्या देकावल्यनुमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पिञ्च॥ परिसंख्या। तथा प्रश्नोत्तरसंकर एव च॥ ६॥ चित्रा वक्रोक्त्यादि पंचभिः श्लोकैरलंकाराणां नामानि ज्ञातव्यानि॥
यथाक्रमं एते चित्रादयश्च तस्यापि ध्वन्यलंकाराः शब्दालंकाराः स्युः॥ इति जात्यादयः पंचात्रिंश अर्थालंकाराः स्युः॥ यत्रां
गसंधितद्रूपैरक्षरैर्वस्तुकल्पना॥ सत्यां प्रसत्तौ तच्चित्रं तच्चित्रं चित्रकृत्तु च यत्॥ ७॥ यत्रालंकारे अक्षरैः कृत्वा वस्तु
कल्पना क्रियते। किंभूतैरक्षरैः अंगैः अवयवैः संधिभिः संधानैश्च तद्रूपैः स्वरूपैः स च्चित्रनामालंकारः॥ स्यात् क्व सति
प्रसत्तौ सत्यां सुललितत्वे सति च पुनः तदपि चित्रं स्यात् यच्चित्रकृत् दोश्चर्यकृत् किं स्वरादिकं स्यात्॥ ७॥ जनैस्पनघन
स्थानध्यान एनश्छिन्नलिनः॥ पुनःपुन जिनः॥ नज्ञानध्यानघनःसनः॥ इति षोडशदलकमलगोमूत्रिका चित्रं॥
अथोदाहरणान्याह॥ स जिनो नः अस्माकं पुनः पुनर्वारंवारं एनः पापं छिन्नत्तु किंभूतो जिनः इनः स्वामी पुनः किं
भूतः भाविकजनस्पनयनस्थाने ध्यानः शाहू सिद्धांतरूपो यस्य स तथा एतावता परमेश्वरस्य वचनेनैव जनं जन
मार्गामार्गप्ररूपति। पुनः किं॥ पीनं स्थूलं ज्ञान ध्यानमेव धनं यस्य स तथा एतावता ज्ञानेपीनं लोकालोकप्र
काशकत्वात्। ध्यानं च पीनं निश्चलत्वात्॥ इति षोडशदलकमलगोमूत्रिका चित्रं॥ ८॥ श्रीशंकरं वंदे॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गणनरगणवरकरतरचरणपरपदशरणगजनपथकथकः॥ अमहनगतमदगजकरयमलशम
॥१४॥ भयजयभयघनवनदहन॥९॥ अथाश्चर्यकृच्चित्राणि॥ हेरामसहेजितत्वंजयसर्वोत्कर्षेणवर्तस्व॥ गणा
गघ्नराःमनुष्याः तेषांगणःसमूहस्तस्यवरोमनोवांछितंतस्यकरःनरोउत्कृष्टकर्तारौचरणौयस्यतथातस्य
संबोधनंक्रियते। परपदंमोक्षपदंतस्यशरणगाःजनालोकास्तेषांपथोमार्गस्यकथकः॥ हेकंदर्परहितहेग
तमदगतोहंकारगजस्यहस्तिनःकरःशुंडादंडस्तद्वद्यमलश्यामवर्णभयमेवघनंनिबिडंवनंतद्दहनःवैश्वानरा
वतारःइतिएकस्वरचित्रं॥९॥ मूलस्थितिमधःकुर्वन्पात्रैर्जुष्टोगताक्षरैः॥ विटःसेव्यःकुलीनस्यतिष्ठतः
पथिकस्यसः॥१०॥ सएवंविधोविटःधूर्तादिमसतीनेरःकस्यकुलीनस्यसव्यःस्यात्अपितुनकस्यापि
किंलक्षणस्यकुलीनस्यपथिमार्गेसदाचोरेतिष्ठतः किंभूतरूपोविटःमूलस्थितिमूलोचारमधःकुर्वन् ॥१५॥
पुनःगताक्षरैर्निरक्षरैर्मूर्खैः पात्रैर्जुष्टःसहितः॥ अथैकारमात्राच्युतकेकृतेसवटःवृक्षःपथिकस्य
सव्योभवति॥ किंभूतोवटवृक्षःमूलस्यस्थितिमवस्थानंअधःपातालंकुर्वन् पुनःगतंआइसक्षरं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

येभ्यस्तानितैः पात्रैरेतावता पत्रैर्जुष्टः। पथिकस्य किंभूतस्य कुलीनस्य कोऽपि मालीनस्य पुनः तिष्ठतः प्रभा
णं कृत्वावस्थितः विटपदादिकारमात्राच्युतकं ॥१०॥ धर्माधर्मविदः साधुपक्षपातसमुद्यताः॥ गुरूणां वंच
नेनिष्ठा नरकेयांतिदुःखिताः ॥११॥ गुरूणां वंचनेनिष्ठास्तत्पराः नरकेनरकगतौ दुःखिता गच्छंति॥ किंभूता
धर्ममधर्ममिव विदंति जानंती ति धर्माधर्मविदः साधूनां सत्पुरुषाणां पक्षः समुदायस्तस्य पातेन समुद्यताः
साधमाः बिंदुच्युतके कृते गुरूणां वचनेनिष्ठास्तत्पराः पुंसः हे नर मनुष्य केदुःखिता यांति अपि तु न केपि
किंभूता धर्ममधर्मं विदंतीति धर्माधर्मविदः साधूनां पक्षपातसाहाय्ये समुद्यताः सावधानाः। वंचनपद
हिंदुमात्रच्युतकं ॥११॥ ककाकुकंककेकाककेकिकोकेककुःककः॥ उरुकुकोकः काककाक्कुग्म्यु काकु
कुकुककांककुः॥१२॥ एकअंजनाचितं। राजीमतिपरित्यागमहाकाव्ये समुद्रवर्णने यं श्लोकः॥ श्री:
एवंविधः समुद्रो वर्तते न कः स्फरणकारी काकुर्ध्वनिविशेषाए यांते ककाककवः कचयः एवंविधाः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१५॥ कंकाजलपक्षिणः तथाकेकामयूरध्वनिरंके चिहृएषांतेकेकांकाएवंविधाः केकिनोमयूराकोका
श्चक्रवाकास्तेषामेकमाद्वितीयंकुःस्थानंयःसः ककाकुं०केनवायुनरउपलक्षितंकंपानीयंयत्रसककः
प्रस्तावादुपचारेणककः समुद्रोज्ञेयः।अकुकुक्षितेकेपानीयेओकोगृहंयेषांते अकुकोकसः॥तेच
तेकाकावायसा।जलवायसाइत्यर्थः॥तेषांकाः स्वरवकरीअक्काः मातरोयास्मिन्सअकुकोकः।काकका
कुः।कुकांवदानांकाककःयकोकयस्ताः ककुतिजलातीति ककाकुकुकएवंविधः कोत्रंधासअंकेक
संगेयस्पसतथा॥एतावताअर्धादेवविष्णुस्तस्यकुर्भूमिस्थानंविष्णोः समुद्रःशायित्वात्।१२।कुर्य
न्द्दियाकराश्लेषंदधच्चरण।डंबरं।युष्मा कंदेवसेनायाः करेणुःप्रसरत्यसौ॥१३॥हेदेवयुष्माकंसैन्यस्यासौ
करेणुःहस्तिःप्रसरतिकिंकुर्वन्दिवाआकाशेनसह काराश्लेषंशुंडादंडाश्लेषं।अथयदिद्दियाकरस्यस्व ॥१५॥
यस्यआश्लेषंकुर्वन्पुनःचरणानामाडंबरंदधत्स्थूलत्वात्।अथकस्मात्च्युतकेकृतेसेनायोरेणुः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रजः॥ प्रसरति किंकुर्वन् दिवाकरस्य सूर्यस्याश्लेषमाछादनं कुर्वन् च पुनः रणस्य संग्रामस्याडंबरं दधत्॥१३॥
प्रस्तुतादपरं वाक्यमुपादायोत्तरप्रदः॥ भंगश्लेषपदेनाह यत्रवाक्रोक्तिरेव सा॥ यत्रोत्तरप्रदः उत्तरदाता प्रस्तुताल
स्तावापन्नादपादन्यवाक्यमर्थं ला तो भंगेनशब्दखंडेन श्लेषपदेन चोभयार्थवाचिना शब्देनैकेनैवाह ब्रूते सा वक्रो
क्तिरेव। एकशब्देन संश्लेष। संलं कोरानइत्युक्त॥१४॥ अथ मयूरान् यतितुरगाननवक्षसः कुतोन्त्य सं॥ ननु कथया
मि कलापिन मिहस्फ कल। पि प्रियकोस्ति॥१५॥ अथ भंगस्योदाहरणमाह॥ काचित् स्त्री केकिनं नृत्यंतं दृष्ट्वा
प्रियं प्रतिप्राह॥ हे नाथ मयूरान् यतिसा प्रियः भंगश्लेष नामाह। हे प्रिये किंनर स्तु किंपुरुषस्तु रंगवदनो मयूः स्त्रीः॥
एतावता मयुः शब्देन किंनरस्तोस्यारोहृदयं तस्यन् यमे नकुतः प्रिया आह॥ नन्व हं कलापिनं कथयामि कलापः
पिछभारो विद्यते यस्य स कलापी॥ तां प्रियस्त्राह॥ हे प्रिये॥ अत्रस्थानेक स्फरवलपतिजलतीति कलापी सको
स्ति॥१५॥ भर्तुः पार्वतिनाम कीर्तयनन्वे त्वां ताडयिष्यास्म हं क्रीडाज्वेन शिवेति स समनघे किं ते भगालः पतिः॥

KKSU LIBRARY
RAMTEK
44 / 106
M-15/6
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नोस्थाणुः किमु कीलको न हि पशुस्वामी । नुगोप्ता गवां दोलाखेलनकर्मणीति विजया गौर्यो गिरः पातु वः ॥१६॥ श्रीः
अथ श्लेषोदाहरणं । दोलाखेलनकर्मणीति किं विजयाह हे पार्वति भर्तुर्नाम कीर्तय कथय । चेन्न कीर्तयिष्यसि तदा
नेन क्रीडाकमलेन त्वां ताडयिष्यामि ॥ गौर्याह ॥ शिव ईश्वरः ॥ विजया सहास्यमाह ॥ हे नघे निष्पापे । स संसरक्षिप्रके ट
मिदं शिवः शृगाल उच्यते । स किं शृगालस्तव भर्ता । गौरी सरोषमाह । हे सखि एवं तदुक्तं न किंतु स्थाणुः स्थाणुशब्द
ईश्वरवाची । विजयाह । स्थाणुशब्देन कीलक उच्यते । स किं तव भर्ता । गौर्याह । न हि किंतु पशुस्वामी । पशुपतिः
विजयाप्याह । नु वितर्के । गवां गोमार्गे गोपालः स किं तव भर्ता इति सखिषु गिरो वाण्य अपूर्वोक्तशब्दस्य वार्थांतरवि
चारणा श्लेषवक्रोक्तिः ॥१६॥ अनुप्रासलक्षणभेदानाह ॥ तुल्यश्रुत्यक्षरावृत्तिरनुप्रासः स्फुरद्गुणः ॥ अतत्पदः स्या त्
छेकानां लाटानां तत्पदश्च सः ॥१७॥ तुल्यानां श्रुतिः श्रवणं आकर्णनं एषां तान्यक्षराणि वर्णास्तेषामावृत्तिः पुन ॥१६॥
रागमनं स अनुप्रासः कथ्यते । किंभूतोनुप्रासः स्फुरंतो दीप्यंतो गुणा औदार्यादयो यस्मात्स स्फुरद्गुणः ॥ श्रीः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुणा अनुप्रासेन दीप्यते स चानुप्रासो द्विधा॥ छेकानुप्रासो लाटानुप्रासश्च॥ तत्र छेकानुप्रासो॥ अतसदः स्यात्ता
न्येव वर्णो कानि पदानि यत्र सन्त तदः न नम दातसदः॥ भिन्नपदइसर्थः॥ लाटानुप्रासश्चतसदःस्यात्॥१७॥ अलंक
लंकशृंगारकर प्रसरं हेलया॥ चंद्र इन्दुचंडीशा निर्मलिमासि न स्पर्शमर्हसि॥१८॥ छेकानुप्रासलक्षणं॥ काचिद्विर
हिणी चंद्रमाह॥ हे चंद्र कर प्रसरहेलया तव किरणविस्तारणलीलया अलंकृतं॥ कलंक एव शृंगारो यस्य स तथा त
स्य संबोधनं। त्वं चंडीशानिर्माल्यमसि यतः सि चंडीशस्य शिवस्य निर्माल्यं विद्यते अतः स्पर्शं नार्हसि स्पर्शयो
ग्यो न भवसि। अन्यदपीश्वरनिर्माल्येन स्पृश्यत्वं न्यस्य कलंको दूषणं। हे चंद्र तवा सं तत निकृष्टस्य स एव भूषणं॥
॥१८॥ रणे रणविदो हत्वा दानवान्दानवद्विषा॥ नीतिनिष्ठ न भूपाल भूरियं भूस्त्वया कृता॥१९॥ अथ लाटानुप्रा
सोदाहरणं पदे आह। कश्चित् कृष्णस्य स्तुतिमाह॥ हे भूपाल पृथ्वीपते। इयं भूः पृथ्वी भूः स सा पृथ्वी त्वया कृता किं
कृता। रणे संग्रामे रणविदः संग्रामनिपुणान्दानवान्कंसादीन्हत्वा विनाश्य पूर्विं किं भूतेन त्वया दानवानां द्विषा वैरिणा
॥१९॥ त्वं प्रियमाचक्ष्व के राक्षि स्वर्गलोकस्कं रंजनेन किं॥ त्वं प्रियाय दिनस्पान्मे स्वर्गलोकसुखेन किं॥२०॥ श्रीः

अथपादेनलाटानुप्रासोदाहरणमाह॥स्रगमं॥२७॥एकत्र पात्रेस्वकलत्रपल्लं नेत्रांम्रतंबिंबितमीक्षमाणः॥श्रीः

पश्यामपोसिंधुरसंपुरस्तान्ममाद कश्चिद्यदुभूमिपालः॥२७॥एतेषुपूर्वोक्तेषु सर्वथातुल्यानामेव वर्णानामाव

त्तिरुक्ता॥संप्रतिकिंचिद्भेदेपिवर्णानांतुल्यश्रुतित्वादनुप्रासः स्यादितिदर्शयति॥कश्चिद्यदुभूमिपालःयादवराज्ञा

सिंधुरसंमदा पश्यामपोपिबतिस्म॥पुरस्तात्पूर्वमेवममादउन्मादंप्रा॥ पुरस्यान्॥तत्रहेतुगर्भितविशेषणमा

ह॥किंकुर्वन्नेकत्रपात्रेएकस्मिन्भाजनेस्वकलत्रस्य वदनंप्रतिबिंबितंनेत्रस्यामृत प्रायंहर्षकारी ईक्षमाणः

पश्यन्नेतावता कलत्र पल्लवस्याथकेलोनादेवप्रथमसुन्मादंप्रासःमद्यंपश्यामपो॥२७॥स्यात्पादपदवर्णा

नामावृत्तिः संयुतायुता॥यमकं भिन्नवाच्यानामादिमध्यांतगोचरं॥२२॥अथयमकलक्षणभेदोप्राह॥श्रीः॥

पादपदवर्णानामावृत्तिःपुनर्भरणंयमकंस्यात्॥वृत्तस्यचतुर्थांशः पादःकथ्यते॥विभक्त्यंतंपदं॥वर्णअक्षरा ॥१८॥

णिएतेषांत्रयाणामप्यावृत्तिर्द्विधाभवति।एकासंयुता।मिलितासंलग्ना अपरा ऽसंयुता ऽसंमिलिता॥एताव

34

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नायमकस्यषड्भेदाःस्युः॥ तत्सद्विधमपियमकंत्रिप्रकारं॥ एकमादिगोचरंयमकपादस्यप्रथमाक्षरविषयं॥ एता
वतायमकस्यस्फुटाअष्टादशभेदाभवंतिचिरंवर्णादीनांसंयुतासंयुतत्वेनान्येपिबहवोभेदाभवंति॥ किंभूतानां
पादपदवर्णानांभिन्नंपृथग्वाच्यअर्थोएषांतेतथा॥ एतावतालाटानुप्रासस्ययमकत्वंनिरस्तंतदर्थस्यैक्यात्॥
अउदाहरणाभिव्यक्तौ॥ यमकोदाहरणंनिदर्शयति॥ दयांचक्रेदयांचक्रे सतांतस्मादूवान्वितं॥ २३॥ चतुरक्षरं
सोमराजीछंदः॥ पाठांतरेतुश्रीडानामाछंदः॥ हेराजन्भवान् हृदयांचक्रेकृतवान्॥ तस्मात्कारणात् दयावान्सतांसत्पु
रुषाणांविसंदअंदयांचक्रे॥ दत्तवान्॥ २३॥ यशास्तेसमुद्रान्सदारोरगारेसदारोरगारे शमनांगकांते॥ ६ हेराजन्तेतव
सत्सधानंयशःकीर्तिःसमुद्रान्आरजगाम॥ किंभूतस्यतवसदासर्वदारोरं दारिद्र्यंगच्छतीतिसदारोरगाएवंविधाआर
योयस्यसतस्यपुनउरगारेःगरुडस्यसमानातुल्याअंगकांतिःशरीरदीप्तिर्यस्यसतस्यस्वर्णवर्णस्येत्यर्थः॥ इदंषड
क्षरंसोमराजीछंदः॥ २४॥ द्विषामुद्धतानांनिहंसि त्वमिंद्रमुदंभोधराणामुदंभोधराणां॥ २५॥ भोराजेंद्र त्वमुद्धता
नांप्रचंडानांद्विषांवैरिणांमुदंहर्षंनिहंसिविनाशयसि॥ कइवकेषां इंद्रइवधराणां॥ यथेंद्रउदंभोधराणां [illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उन्नतम धानां धराणां पर्वतानां मुदं हर्षं निहंसि । इदमपि षडक्षरं सोमराजी नाम छंदः ॥ २५ ॥ विभाति रामापरमारण
स्य से देव तेजोर्जितराजमान ॥ विभाति रामापरमारणस्य से देव तेजोर्जितराजमान ॥ २६ ॥ हि राजेंद्र तेतव चरणस्य
संग्रामस्य विभाप भा सेदेव सर्वदा विभाति शोभते किंभूतारणस्य प्रभातिरामा । अभिरामा अतिकांता रामा लक्ष्म स्याग्र
जाद्य कृष्णाताययासा पुनः परमा सर्वो कृष्ट पुनः रामा रम्या मनोहरा । हे अजव द्विषुव दूजितेन बलेन राजमान शोभ
मान । सहदेवेन भाग्येन वर्तितः सदैवं तेजः प्रतापः तेनार्जितउपार्जितो राजस्कभूपेषु मानः संमानः पूजा वा येन स
तस्य संबोधनं ॥ २७ ॥ सारंगवयसं निध्यराजिकाननमग्रतः ॥ सारंगवयसं निध्य दारुणं शिखरे गिरेः ॥ २७ ॥ अथ
श्री गिरिनारी वर्णनं ॥ हे मित्र अग्रतः पुरस्तात् पगिरेर्गिरिनारि पर्वतस्य शिखर शृंगे काननं वनं अराजि विभाति स्म ॥ ॥ १८ ॥
किंभूतं सारंगवयसां हरिणपक्षिणां निधिनिधानरूपं स्थानं । पुनः सारं प्रधानं । पुनः गवयसां अरण्यसंज्ञानां सांनि
ध्येन नैकधेन दारुणं अनाकलनीयं । अथपगांतरे भारमा ॥ गिरेः श्री गिरिनारस्य शिखरे वनमग्रतः पुरस्तात् वर्तते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ भातीत्तिरोषं। कीदृशंयवनंसारंप्रधानं।पु नःगवयानामरंण्पसंडानांसान्निध्येनसमीपप्रभावेनराजतेइसेवंश्रीलं।पुनःसारं
गाणांहरिणानांवयसांपक्षिणांचस्थानमितिरोषः।पुनःनिधिभिःअदारुणंभरोद्रंमनोरममित्यर्थः।अथवासारंगवयसांनिचिरूपं
स्थानकंअदारुणंच।निध्यदारुणं॥२७॥अमनगरस्मेराक्षीणांप्रपंचयति॥स्फुरत्सुरतरुचयकुर्वाणानांबलक्षमरंहसां।इहसहसु
रैरायांतीनांनरेन्द्रानगेन्वहंसुरतरुचयेकुर्वाणानांबलक्षमरंहसां।२८।हेनरेन्द्राहेबलक्षमवीर्यसमर्थ।इहास्मिन्नगेश्रीगिरिना
रपर्वतेबाणानांबाणवृक्षाणांरकुःभूमिःअमरनगरस्मेराक्षीणांस्वर्गस्त्रीणांदेवीनांरहसंवेगंप्रपंचयतिविस्तारयतिमनोहरत्वात्।
कीदृशेनगस्फुरंतःशोभमानाःस्फुरंतरूणांकल्पवृक्षाणांचयःसमूहोयत्रतस्मिन्॥कीदृशानांअमरक्षीणां॥सुरैर्देवैःसह
सुरतरुचयसंभोगाभिलाषायअन्वहंसर्वदाआयांतीनांआगच्छंतीनां।बाणवृक्षभूमिकामनोहरत्वात्देवीनांमार्गवे
गमुत्पादयति।पुनःअरंअसमर्थंबलक्षंधवलंहास्यंकुर्वाणानांविदधतीनां।एतावतास्मिन्पर्वतेसुरैःसहसंभोगंकर्तुं
देमःसमागच्छंतीत्यर्थः॥२८॥आसन्नदेवानररराजराजिरुच्चैस्तरानामिमयत्रनादो॥कीडाकुतोयत्रादिगंतनागा
आसन्नदेवानररराजराजिः॥२९॥अत्रादोपर्वतेइयंतरानांराजिःश्रेणिःनरराजइतिनकिंतुररराजेवकिंभूतातरानांराजिः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१९॥

असन्न असुच्चैः स्तटलाद्रासन्ना अदूरादेवायस्याः सा॥यत्रपर्वतेदिगंतनागादिग्गजेंद्राः नदेहृदेजलाशये कीडा कृत
आसन्नेवर्त्तते स्म॥ किं भूतेपर्वते वानरराजराजि। वानरराजेनवानरेंद्रेणराजिशोभमाने॥२९॥रंभारामाकुरबककम
ला॥रंभारामाकुरबककमला॥रंभारामाकुरबककमला॥रंभारामाकुरबककमला॥३०॥हे अबककरक्षक श्रीनेमेए
वंविधाकुः श्रीगिरिनारस्यभूमिः पर्वते किंभूताकुः रंभारामा रंभानां कदलीनां आरामा निवनानि यस्यां सा॥पुनःक
मलारंभाकमलानां पद्मानां [illegible] अरंभ उत्पत्तिर्यस्यां सा। रामारमणीया। कुरबकैः वृक्षविशेषैः कमलाशोभायस्यां
सातथा॥रंभा असार ससस्ता एवनार्योयस्याः सा अकुसितापुनः अबकं बकपक्षिरहितं कंपानीयंमलंतिधारयतीति
मलधारणे। अरम सर्वथा भेर्नक्षत्रेः आर्द्राभद्रामाकब्रूरवर्णा। पुनःकुत्सितोरबकः शब्दोयेषां तकुरबकाः नकुरबकाः
अकुरबकाः कमलाहारिणायस्यां सा॥३०॥हारीनहारीततमेषधत्तेसेवालसेवालसहंसमंभः॥जंबालजंबालमुलं
दधानंमंदारमंदारवयायुरद्रिः॥३१॥एष अद्रिः पर्वतः अंभःपानीयंधत्तोकिंभूतोद्रिः हारीनैः पक्षिविशेषैः हारी ॥१९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनोहारी किंभूतमंभः ततं विस्तीर्णं ॥ सेवालस्पर्से वायां अलसा मंथरा यत्र तं । पुनः जंबाले पंके जातं जंबालजं कमलं अलम
सूर्यं दधानो दधत् किंभूतं नवं ॥ छगं काले अप्रौढं नवीनं । पुनः किंभूतो द्रिः मंदार वृक्षेषु मंदं अरवः अल्मरा द्वौ वायुर्यत्र स
तथा ॥ ३१ ॥ नेमि विशालनयनो नयनोदित श्रीः भ्रांत बुद्धि विभवो विभवो भभूयः ॥ प्राप स्त दे ति नगरा न्नगराजित त्र
स्तेन चारु जगदे जगदेकनाथं ॥ १ ॥ अथानंतरं तदा प्रस्तावे भूयो वारंवारं श्री नेमिः सूतेन सारथिना चारु मनोह
रं यथा भवति तथा इ से वं रूपं जगदे बभाष किंभूतो नेमिः विशाल नयनः विस्तीर्ण नेत्रः नयनेन न्याय मार्गेण ॥ दित प्रे
रिता श्रीर्यस्मिन् स तथा ॥ अभ्रांतः स्वयबुद्धि रूपो विभवो चिंतयस्य स तथा ॥ विगतो नष्टो भवः संसारो यस्मात् स तथा
विभवः ॥ पाठांतरेपि ॥ मासोम हा जनगरात् महद्धिजुन नगरात् द्वारवतीतः तत्र तस्मिन् नगराजि श्री गिरिनार पर्वते प्रा
सः ॥ पुनः जगदेकनाथः त्रिभुवनैकनाथः ॥ ३२ ॥ यदुपांतके षु सरलाः सरलाय दनुच्छ्र्यल ति हरिणा हरिणाः ॥ तदिदं
विभाति कमलं कमलं पदमस्य यत्र परमा परमा ॥ ३३ ॥ तदिदं कं पानीयमलं अत्यर्थं विभाति ॥ यदुपांतिके षु यस्य समी
पेषु सरलाः अवक्राः उच्चैस्तराः सरलाः देवदारवो वृक्षाः वर्तंते ॥ यद्यलमनु लक्षीकृत्य हरिणा वायुना सह वेगेन
हरिणाः मृगाः उच्छलंति उल्लाबल्लेन भ्रमंति । यत्र पानीये परमा लक्ष्मी इ सत्यं देहेन आगा सक म उपदं स्थानं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपलोभपञ्जवेश्या इतिवचनात्॥३३॥ कांतारभूमौ पिककामिनीनां कांतारवाचांक्षमतेस्मसोढुं॥ कांतारतेशे ध्वनिवर्त
माने कांतारविंदस्यमधोः प्रवेशे॥३४॥ कांतास्त्रीरतेशेभर्तरि अध्वनिमार्गे वर्तमानेसतिमधो र्वसंतस्यप्रवेशेप्रारंभे
कांतारभूमौवनस्पभूमिकायांपिकस्यकामिनीनांकोकिलानांतारवाचांमनोज्ञवाणीसोढुंकांक्षमतेस्म॥अपितुन
कामपि॥ किंभूतस्यमधोः कांतानिमनोज्ञानिअरविंदानिकमलानियस्मिन्सतथा॥३४॥ चकारसाहसंयुद्धधृतो
द्गासाहसंचया॥ दैन्यंतांसहसंप्राप्तद्विषांसोत्साहसंततिः॥३५॥ हेसोत्साहसाध्यमराजन्सा द्विषावैरिणांसंततिः
श्रेणिः दैन्यंदीनतांसंप्राप्तायाद्विषांसंततिः युद्धसाहसंधीरत्वंचकार कृतवान्॥ चपुनःधृतोद्गासोसहर्षासती हसंहा
स्यंचकार॥ पुनश्चसा तांभूपंमेसाह॥३५॥ गिरांश्रूयतेकोकिलाकोविदारं यतस्तद्भूनं विस्फुरत्कोविदारं॥ मुनीनां
वसत्यत्रलोकोविदारंनचक्रेऽयं चक्रेकृतौकोविदारं॥३६॥ अत्रवनेकोकिलाश्रूयते॥ किंभूताकोकिलागिरांवा
णीनांअरं अत्यर्थं कोविदापंडिताः॥ यतस्तस्मात्कारणात्नूनं विस्फुर त्कोविदारंवर्तते॥ विस्फुरंतोविकसंतः
कोविदाराः कर्णिकारवृक्षाः यस्मिन्॥ अत्रवनेमुनीनांलोकः तापसजनः विदारंनिःकलत्रंयथाभवतितथावर्त ॥३७॥
ते॥ चपुनरत्रआध चक्रं आरवटस्यकुलंकृतौ कः कृतनिवासंवर्तते॥ किंभूतंवीनपक्षिणः दारयतीति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीः॥ सिंधुरोचितलताग्रसल्लुकी। सिंधुरोचितमुपेत्य किंनरैः॥ कंदराजितगृहश्रिगीयते कंदराजितमदस्तटं गिरेः॥३७॥
अगः गिरेस्तटंउपेत्य आगत्य किन्नरैः गी यते॥ किंभूतं तटं सिंधुराणां हस्तीनां उचिताः योग्याः लतावल्यस्तासु अग्राः प्रधानाः
सल्लुक्यः सल्लुकीवृक्षाः यस्मिंसाएवंविधा सिंधुर्नदी तयारोचितं रोभितं॥ पुनः कंदैर्वृक्षविशेषैः राजितं॥ पुनः कंद
राभिः गुहाभिर्जितागृहश्रीर्मंदरस्य शोभायेनतत्तथा॥३७॥ वसन्सरोगोत्र जनोन कश्चिसरंसरोगायदिराजहंसः॥
गीतं कलंकोक्विन्न नकरोतिसिद्धसौरूपूर्वीतैकः सिद्धोदेवविशेषः कलंमधुरं गीतंगानं न करोती॥ अपितुसर्वः
करोत्येव॥ कीदृशोरोल्लककलंकाक्षितकानने वनस्पकलंक रूपेः वृक्षविशेषैर्वर्जिते॥ सर्वोहृष्टइ सर्धः॥ अत्ररो
लेजनः वसन्सरोगोसआधिः न कश्चित्यदिचवर्तते॥ तदापरं केवलस्सरोगोराजहंसोवर्तते॥ सरसिसरोवरेगच्छती
तिसरोगः॥३८॥ जहुर्वसंतसरसीं नवारणा बभुः पिकानां सरसा नवारणाः॥ रसंचकामोहनकोविदारकं॥
विलोकयंती बकुलाननुविदारकं॥३९॥ वसंतमासे वारणा हस्तिनः सरसीं सरोवरं न जहुः न तत्यजुः पिकानां
कोकिलानां सरसाः कर्णस्फुरयदाः अवोधेमधुराः नवा अपूर्वाः रणाः शब्दाः बभुश्चकासिरे॥ तथाचकाश्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मोहनकोविदाः सुरतपंडिता बकुलान् वृक्षविशेषान् विलोकयंती सती कंरसंनआर अपितु सर्वमपि रसं प्राप्नैव ।। कथं
यथा भवति विदारकं निःपुत्रं यथा भवति निःपुत्रायाः संभोगक्षमसात् ।।३९।। वारणाः प्रसूतनिकरावरणा मलि
नां वहंती पटली ॥ मलिनां ।। तरवः सदात्र शिखिजा तरवः सरसस्य भाति निकटे सरसः ।।४०।। इति असंयुतआ
द्यंतपादांतयमकं ।। वरणा वृक्षविशेषाः वर्तंते । किंभूता वरणाः प्रसूननिकरः पुष्पसमूह एव आवरणमाच्छादनं
एषां ते तथा ।। तरवः वृक्षाः अलीनां भ्रमराणां पटली श्रेणी वहंती ।। किंभूतां पटलीं मलिनां श्यामवर्णां ।। अत्र पर्वते
सरसः सरोवरस्य निकटे समीपे शिखिजा तरवः मयूरात् उत्पन्नो रवः भाति ।। किंभूतो रवः सरसः ।।४०।। श्रीशंकर ।।

वाक्रुभेद्दा ठकारस्यावण्ण

।।२१।।

तयकृणित्यतेतांसिवा।। ईतिषम

KKSU LIBRARY RAMTEK 441 106 M.1516 Dist Nagpur

42

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=17.10.20 16:07
,TRANSFERRED=2020/10/17 at 16:12:57
,PAGES=42
,TYPE=STD
,NAME=S0004108
,Book Name=M-1516-VAGBHATTALANKAR VYAKHYA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection